संस्कृत

स्तोत्र

विष्णुसहस्त्रनाम

६८/स्तो. ३६४

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(1)

॥ ॥ इदं पुस्तकं लेखकपाठकयोः शुभं भवतु ॥ छ ॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai." " Joint project of the

वि०स०
॥२॥

॥ ॥श्रीगणेशायनमः॥ वैशंपायनउवाच॥ ॥श्रुत्वा धर्मानशेषेणपावनानिचसर्वशः॥युधिष्ठिरःशांतनवंपुनरेवाभ्यभाषत॥१॥ ॥युधिष्ठिरउवाच॥ ॥किमेकंदैवतंलोकेकिंवाप्येकंपरायणं॥स्तुवंतःकंकमर्चंतःप्राप्नुयुर्मानवाःशुभं॥२॥कोधर्मःसर्वधर्माणांभवतःपरमोमतः॥ किंजपन्मुच्यतेजंतुर्जन्मसंसारबंधनात्॥३॥भीष्मउवाच॥ ॥जगत्प्रभुंदेवदेवमनंतंपुरुषोत्तमं॥स्तुवन्नामसहस्रेणपुरुषःसततोत्थितः॥४॥तमेवचार्चयन्नित्यंभक्त्या

यस्यस्मरणमात्रेणजन्मसंसारबंधनात्॥विमुच्यतेनमस्तस्मैविष्णवेप्रभविष्णवे॥८

स्त०म
॥१॥

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

2A

पुरुषमव्ययं॥ध्यायंस्तुवन्नमस्यंश्चयजमानस्तमेवच
॥५॥अनादिनिधनंविष्णुंसर्वलोकमहेश्वरं॥लोकाध्यक्षं
स्तुवन्नित्यंसर्वदुःखातिगोभवेत्॥ ६॥ब्रह्मण्यंसर्वधर्म
ज्ञंलोकानांकीर्तिवर्धनं॥लोकनाथंमहद्भूतंसर्वभूतभवो
द्भवं॥ ७॥ एषमेसर्वधर्माणांधर्मोधिकतमोमतः॥यद्भ=
क्त्यापुंडरीकाक्षंस्तवैरर्चेन्नरःसदा॥ ८॥ परमंयोमह
त्तेजःपरमंयोमहत्तपः॥परमंयोमहद्ब्रह्मपरमंयःपरा
यणं॥ ९॥पवित्राणांपवित्रंयोमंगळानांचमंगळं॥दैव
तंदेवतानांचभूतानांयोव्ययःपिता॥ १०॥ यतःसर्वा

" Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

वि॰स॰
॥२॥

(3)

णिभूतानिभवंत्यादियुगागमे॥ यस्मिंश्चप्रलयंयांति
पुनरेवयुगक्षये॥११॥ तस्यलोकप्रधानस्यजगन्नाथ
स्यभूपते॥ विष्णोर्नामसहस्रंमेशृणुसर्वभयापहं॥१२॥
यानिनामानिगौणानिविख्यातानिमहात्मनः॥ ऋषि
भिःपरिगीतानितानिवक्ष्यामिभूतये॥१३॥
अस्यश्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमंत्रस्य॥ भगवा
न्वेदव्यासऋषिः॥ श्रीकृष्णःपरमात्मादेवता॥ अनुष्टु
प्छंदः॥ अमृतांशूद्भवोभानुरितिबीजं॥ देवकीनंदनः
स्रष्टेतिशक्तिः॥ उद्भवःक्षोभणोदेवेतिपरमोमंत्रः॥ शं

स्त्र॰म
॥२॥

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

3A

खड्गन्नंदकी चक्रीतिकीलकं ॥ शार्ङ्गधन्वागदाधरेत्यस्त्रं
रथांगपाणिरक्षोभ्यइतिकवचं ॥ आनंदंपरमंब्रह्मेतियो
निः ॥ विश्वरूपेतिध्यानं ॥ श्रीकृष्णप्रीत्यर्थेजपेविनियो
गः ॥ ॥ ॐ ह्रांखड्गन्नंदकीहृदयायनमः ॥ चक्रीशिरसेस्वा
हा ॥ शार्ङ्गधन्वाशिखायैवौषट् ॥ गदाधरायकवचायहुं ॥
रथांगपाणिरक्षोभ्यइति नेत्रत्रयायवौषट् ॥ सर्वप्रहरणा
युधोन्नमइति अस्त्रायफट् ॥ भूर्भुवःस्वरोमितिदिग्बंधः ॥
॥ ॥ अथध्यानं ॥ ॥ क्षीरोदन्वत्प्रदेशेशुचिमणिविलसत्सैक
तेमौक्तिकानांमालाक्लृप्तासनस्थःस्फटिकमणिनि=

वि० स० भैर्मौक्तिकैर्मंडितांगः ॥ शुभ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्त
॥ ३ ॥ पीयूषवर्षैरानंदीनःपुनीयादरिनलिनगदाशंखपाणिर्मु
कुंदः ॥ १ ॥ भूःपादौयस्यनाभिर्वियदसुरनिलश्चंद्रसूर्यौचने
(५) त्रेकर्णावाशाशिरोद्यौर्मुखमपिदहनोयस्यवास्तेयमब्धिः ॥
अंतस्थंयस्यविश्वंसुरनरखगगोभोगिगंधर्वदैत्यैश्चि
त्रंरंरम्यतेतंत्रिभुवनवपुषंविष्णुमीशंनमामि ॥ २ ॥ ॐ
विश्वंविष्णुर्वषट्कारोभूतभव्यभवत्प्रभुः ॥ भूतकृद्भूतभृद्भावो
भूतात्माभूतभावनः ॥ ३ ॥ पूतात्मापरमात्माचमुक्तानांपर स० म
मागतिः ॥ अव्ययःपुरुषःसाक्षीक्षेत्रज्ञोक्षरएवच ॥ ४ ॥ ॥ ३ ॥

5A

योगोयोगविदान्नेताप्रधानपुरुषेश्वरः॥नारसिंहवपुः
श्रीमान्केशवःपुरुषोत्तमः॥५॥सर्वःशर्वःशिवःस्थाणुर्भू
तादिर्निधिरव्ययः॥संभवोभावनोभर्ताप्रभवःप्रभुरीश्व
रः॥६॥स्वयंभूःशंभुरादित्यःपुष्कराक्षोमहास्वनः॥अनादि
निधनोधाताविधाताधातुरुत्तमः॥७॥अप्रमेयोहृषीके
शःपद्मनाभोमरप्रभुः॥विश्वकर्मामनुस्त्वष्टास्थविष्ठःस्थवि
रोध्रुवः॥८॥अग्राह्यःशाश्वतःकृष्णोलोहिताक्षःप्रतर्दनः॥
प्रभूतस्त्रीककुब्धामपवित्रंमंगळंपरं॥९॥ईशानःप्राणदः
प्राणोज्येष्ठःश्रेष्ठःप्रजापतिः॥हिरण्यगर्भोभूगर्भोमाधवो

A joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

वि० स०
॥४॥

(5)

मधुसूदनः॥१०॥ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्र
मः॥अनुतमो दुराधर्षः कृतज्ञः कृतिरात्मवान्॥११॥सुरे
शः शरणं शर्म विश्वरेताः प्रजाभवः॥अहः संवत्सरो व्या
लः प्रत्ययः सर्वदर्शनिः॥१२॥अजः सर्वेश्वरः सिद्धः सिद्धिः
सर्वादिरच्युतः॥वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः॥
वसुर्वसुमनाः सत्यः समात्मा सम्मितः समः॥अमोघः पुं
डरीकाक्षो वृषकर्मा वृषाकृतिः॥१४॥रुद्रो बहुशिरा बभ्रु
र्विश्वयोनिः शुचिःश्रवाः॥अमृतः शाश्वतः स्थाणुर्वरारो
हो महातपाः॥१५॥सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः॥ ॥४॥

स०म०

Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

वेदोवेदविदव्यंगोवेदांगोवेदवित्कविः॥१६॥लोकाध्यक्षःसुराध्य
क्षोधर्माध्यक्षःकृताकृतः॥चतुरात्माचतुर्व्यूहःचतुर्दंष्ट्रश्च
तुर्भुजः॥१७॥भ्राजिष्णुर्भोजनंभोक्तासहिष्णुर्जगदादिजः॥अ
नघोविजयोजेताविश्वयोनिःपुनर्वसुः॥१८॥उपेंद्रोवामनः
प्रांशुरमोघःशुचिरूर्जितः॥अतींद्रःसंग्रहःसर्गोधृतात्मानि
यमोयमः॥१९॥वेद्योवैद्यःसदायोगीवीरहामाधवोमधुः॥
अतींद्रियोमहामायोमहोत्साहोमहाबलः॥२०॥महाबुद्धि
र्महावीर्योमहाशक्तिर्महाद्युतिः॥अनिर्देश्यवपुःश्रीमानमे
यात्मामहाद्रिधृक्॥२१॥महेष्वासोमहीभर्ताश्रीनिवासःस

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

वि॰स॰ तांगतिः॥अनिरूद्धः सदानंदोगोविंदोगोविदांपतिः॥२२॥मरीचि
॥५॥ र्दमनोहंसः सुपर्णोभुजगोत्तमः॥हिरण्यनाभः सुतपाः पद्म
नाभः प्रजापतिः॥२३॥अमृतः सर्वदृक्सिंहः संधातासंधि
(6) मान्स्थिरः॥अजोदुर्मर्षणः शास्ताविश्रुतात्मासुरारिहा॥
गुरुर्गुरुतमोधामः सत्यः सत्यपराक्रमः॥निमिषोनिमिषः
स्रग्वीवाचस्पतिरुदारधीः॥२५॥अग्रणीर्ग्रामणीःश्रीमा
न्यायोनेतासमीरणः॥सहस्रमूर्द्धाविश्वात्मासहस्राक्षः
सहस्रपात्॥२६॥आवर्तनोनिवृत्तात्मासंवृतः संप्रमर्दनः॥ ॥५॥
अहः संवर्तकोवह्निरनिलोधरणीधरः॥२७॥सुप्रसादः प्र

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6A)

सन्नात्मा विश्वधृग्विश्वभुग्विभुः ॥ सत्कर्ता सत्कृतिः साधु
र्जह्नुर्नारायणो नरः ॥ २८ ॥ असंख्येयोऽप्रमेयात्मा विशिष्टः शि
ष्टकृच्छुचिः ॥ सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाध
नः ॥ २९ ॥ वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ॥ वर्द्धनो वर्द्ध
मानश्च विविक्तः श्रुतिसागरः ॥ ३० ॥ सुभुजो दुर्धरो वाग्मी म
हेंद्रो वसुदो वसुः ॥ नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥
ओजस्तेजोद्युतिधरः प्रकाशात्मा प्रतापनः ॥ ऋद्धः स्पष्टाक्षरो
मंत्रश्चंद्रांशुर्भास्करद्युतिः ॥ ३२ ॥ अमृतांशूद्भवो भानुः शशि
बिंदुः सुरेश्वरः ॥ औषधं जगतः सेतुः सत्यधर्मपराक्रमः ॥

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

वि०स०
॥ ६ ॥

७

भूतभव्यभवन्नाथः पवनः पावनोनळः ॥ कामहाकामकृत्कांतः
कामः कामप्रदः प्रभुः ॥ ३४ ॥ युगादिकृद्युगावर्तोनैकमायोमहा
शनः ॥ अदृश्योव्यक्तरूपश्चसहस्रजिदनंतजित् ॥ ३५ ॥ इष्टोवि
शिष्टः शिष्टेष्टः शिखंडीनहुषोवृषः ॥ क्रोधहाक्रोधकृत्कर्त्ता
विश्वबाहुर्महीधरः ॥ ३६ ॥ अच्युतः प्रथितः प्राणःप्राणदोवासवा
नुजः ॥ अपान्निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ३७ ॥ स्कंदः
स्कंदधरोधूर्योवरदोवायुवाहनः ॥ वासुदेवोबृहद्भानुरादिदेवः
पुरंदरः ॥ ३८ ॥ अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ॥ ॥ ६ ॥
अनुकूलः शतावर्तःपद्मीपद्मनिभेक्षणः ॥ ३९ ॥ पद्मनाभो

"A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai."

(7A)

नविंदाक्षःपद्मगर्भःशरीरभृत्॥महर्द्धिऋद्धोवृद्धात्मामहाक्षो
गरुडध्वजः॥४०॥अतुलःशरभोभीमःसमयज्ञोहविर्हरिः॥स
र्वलक्षणलक्षण्योलक्ष्मीवान्समितिंजयः॥४१॥विक्षरोरोहि
तोमार्गोहेतुर्दामोदरःसहः॥महीधरोमहाभागोवेगवानमि
ताशनः॥४२॥उद्भवःक्षोभणोदेवःश्रीगर्भःपरमेश्वरः॥करणं
कारणंकर्त्ताविकर्त्तागहनोगुहः॥४३॥व्यवसायोव्यवस्थानः
संस्थानःस्थानदोध्रुवः॥परर्द्धिःपरमस्पष्टस्तुष्टःपुष्टःशुभेक्ष
णः॥४४॥रामोविरामोविरजोमार्गोनेयोनयोनयः॥वीरःश
क्तिमतांश्रेष्ठोधर्मोधर्मविदुत्तमः॥४५॥वैकुंठःपुरुषःप्राणः

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

वि०स०
॥८॥
(8)

प्राणदःप्रणवःपृथुः॥हिरण्यगर्भःशत्रुघ्नोव्याप्तोवायुर
धोक्षजः॥४६॥ऋतुःसुदर्शनःकाळःपरमेष्ठीपरिग्रहः॥उग्रः
संवत्सरोदक्षोविश्रामोविश्वदक्षिणः॥४७॥विस्तारःस्थाव
रःस्थाणुःप्रमाणंबीजमव्ययं॥अर्थोनर्थोमहाकोशोमहा
भोगोमहाधनः॥४८॥अनिर्विण्णःस्थविष्ठोभूर्धर्मयूपोमहा
मखः॥नक्षत्रनेमिर्नक्षत्रीक्षमःक्षामःसमीहनः॥४९॥यज्ञइ
ज्योमहेज्यश्चक्रतुःसत्रंसतांगतिः॥सर्वदर्शीविमुक्तात्मास
र्वज्ञोज्ञानमुत्तमं॥५०॥सुव्रतःसुमुखःसूक्ष्मःसुघोषःसुख ॥८॥
दःसुहृत्॥मनोहरोजितक्रोधोवीरबाहुर्विदारणः॥५१॥स्वाप

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai, joint project

8A

नःस्वयंभूर्व्यापीनैकात्मानेककर्मकृत्॥वत्सरोवत्सलोवत्सी
रत्नगर्भोधनेश्वरः॥५२॥धर्मगुब्धर्मकृद्धर्मीसदसत्क्षरमक्ष
रं॥अविज्ञातासहस्रांशुर्विधाताकृतलक्षणः॥५३॥गभस्तिने
मिःसत्वस्थःसिंहोभूतमहेश्वरः॥आदिदेवोमहादेवोदेवेशो
देवभृद्गुरुः॥५४॥उत्तरोगोपतिर्गोप्ताज्ञानगम्यःपुरातनः॥
शरीरभूतभृद्भोक्ताकपींद्रोभूरिदक्षिणः॥५५॥सोमपोमृतपः
सोमःपुरुजित्पुरुसत्तमः॥विनयोजयःसत्यसंधोदाशार्हःसा
त्वतांपतिः॥५६॥जीवोविनयितासाक्षीमुकुंदोमितविक्रमः॥
अंभोनिधिरनंतात्मामहोदधिशयोंतकः॥५७॥अजोमहार्हः

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan

वि०स० स्वाभाव्योजितामित्रः प्रमोदनः ॥ आनंदोनंदनोनंदी सत्यधर्मा
॥ ८ ॥ त्रिविक्रमः ॥ ५८ ॥ महर्षिः कपिलाचार्यः कृतज्ञोमेदिनीपतिः ॥
त्रिपदस्त्रिदशाध्यक्षोमहाशृंगः कृतांतकृत् ॥ ५९ ॥ महावरा
(९) होगोविंदः सुषेणः कनकांगदी ॥ गुह्योगभीरोगहनोगुप्तश्च
क्रगदाधरः ॥ ६० ॥ वेधाः स्वांगोजितः कृष्णोदृढः संकर्षणोच्यु
तः ॥ वरुणोवारुणोवृक्षः पुष्कराक्षोमहामनाः ॥ ६१ ॥ भगवान्भ
गहानंदीवनमालीहलायुधः ॥ आदित्योज्योतिरादित्यः सहि
ष्णुर्गतिसत्तमः ॥ ६२ ॥ सुधन्वाखंडपरशुर्दारुणोद्रविणप्रदः ॥ ॥ ८ ॥
दिवस्पृक्सर्वदृग्व्यासोवाचस्पतिरयोनिजः ॥ ६३ ॥ त्रिसामासा

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

9A

मगः सामनिर्वाणं भेषजं भिषक् ॥ संन्यासकृत्समः शांतो निष्ठा
शांतिः परायणः ॥ ६४ ॥ शुभांगः शांतिदः स्रष्टा कुमुदः कुवलेश
यः ॥ गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ॥ ६५ ॥ अनिवर्ती
निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ॥ श्रीवत्सवक्षाः श्रीवासः श्री
पतिः श्रीमतांवरः ॥ ६६ ॥ श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः
श्रीविभावनः ॥ श्रीधरः श्रीकरः श्रेयः श्रीमान्लोकत्रयाश्र
यः ॥ ६७ ॥ स्वक्षः स्वंगः शतानंदो नंदिर्ज्योतिर्गणेश्वरः ॥ विजि
तात्मा विधेयात्मा सत्कीर्तिः छिन्नसंशयः ॥ ६८ ॥ उदीर्णः
सर्वतश्चक्षुः रनीशः शाश्वतः स्थिरः ॥ भूशयो भूषणो भूति
र्विशोकः शोकनाशनः ॥ ६९ ॥ अर्चिष्मानर्चितः कुंभो विशुद्धा

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

वि॰स॰ ॥ ६ ॥ त्मा विशोधनः ॥ अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ॥
काळनेमिनिहा वीरः शूरः शौरिर्जनेश्वरः ॥ त्रिलोकात्मा त्रि
लोकेशः केशवः केशिहा हरिः ॥ ७२ ॥ कामदेवः कामपाळः का
(१०) मी कांतः कृतागमः ॥ अनिर्देश्यवपुर्विष्णुर्वीरोऽनंतो धनंजयः ॥
ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्द्धनः ॥ ब्रह्मविद्ब्राह्म
णो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥ ७३ ॥ महाक्रमो महाकर्मा
महातेजा महोरगः ॥ महाक्रतुर्महायज्वा महायज्ञो महाहविः
॥ ७४ ॥ स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिः स्तोता रणप्रियः ॥ पूर्णः पू ॥ ९ ॥
रयिता पुण्यः पुण्यकीर्तिरनामयः ॥ ७५ ॥ मनोजवस्तीर्थ

10A

करोवसुरेतावसुप्रदः॥ वसुप्रदोवासुदेवोवसुर्वसुमनाहविः॥
सद्गतिःसत्कृतिःसत्तासद्भूतिःसत्परायणः॥ शूरसेनोयदु
श्रेष्ठःसन्निवासःसुयामुनः॥७७॥ भूतावासोवासुदेवःसर्वासु
निलयोनलः॥ दर्पहादर्पदोदृप्तोदुर्धरोथापराजितः॥७८॥
विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान्॥ अनेकमूर्ति
रव्यक्तःशतमूर्तिःशताननः॥७९॥ एकोनैकःसवःकःकिं
यत्तत्पदमनुत्तमं॥ लोकबंधुर्लोकनाथोमाधवोभक्तवत्सलः
॥८०॥ सुवर्णवर्णोहेमांगोवरांगश्चंदनांगदी॥ वीरहाविषमः
शून्योघृताशीरचलश्चलः॥८१॥ अमानीमानदोमान्यो
लोकस्वामीत्रिलोकधृक्॥ सुमेधामेधजोधन्यःसत्यमेधा

Joint Project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com